Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 3 | ISSN : 2582-0095

# शकुन्तलाया: भाग्यवाद:

Sraboni Tudu
Assistant Professor, Department of Sanskrit, Durgapur Women's College, West Bengal.

**Artic Info**
Volume 5, Issue 3
Page Number : 75-82

**Publication Issue :**
May-June-2022

**Article History**
Accepted : 01 May 2022
Published : 10 May 2022

**सारांश**:- भारतीयकर्मसिद्धान्तानुसारेण सर्वं कर्म दैवायत्तमिति सिद्धान्त:। तथापि लोके दैवमनुसरन् प्रयत्नकरणमेव प्रचुरतया दृश्यते। फलं च दैविकमेव। "निराशापीडितस्य लोकस्य भाग्यमेव प्राणालम्बनभूतम्। कार्ये विफले जीवितस्य त्यागो न कार्य:। कदाचिदपि दैवेन कार्यसिद्धिर्भविष्यतीति आर्षं वाक्यम्। भारतीया: स्वशक्तेरप्यात्मनो भाग्य एव विश्वासं कुर्वन्ति। महात्मन: विनयसम्पन्ना: सन्तोऽपि "सर्व: गुरोरनुग्रह एव, नियोक्तु: शक्ति: अनुकूलं च दैवं कार्यसाधने कारणम्" इति आमनन्ति। अत: कीदृशं शकुन्तलाया: जीवने भाग्यमासीदिति विषयमाधारीकृत्य मया लेखेऽस्मिन् विचार: विहित:।

**विशेषशब्दा:** – दैष्टिक:,आस्तिक:, भाग्यपदस्य व्युत्पत्ति:, भाग्यवाद:, शकुन्तला, कण्वप्रेम, अङ्गुलीयकप्राप्ति:, कश्यपाश्रमे निवास:, भाग्यविपर्यय:,शापवृत्तान्त: इत्यादय:।

सर्वस्मिन् भूलोके भारतजाति: प्राचीनतमा। भारतीया: सर्वे आस्तिका: भारतीयेषु इदानींतने काले एव किञ्चिदिव नास्तिक्यबुद्धि: हेतुवादजन्या दृश्यते।प्राचीना: सर्वे वेदशास्त्रपुराणेषु कृतविश्वासा: तेषां विषये हेतुवादं नाङ्गीचक्रु:।

**पुराणं मानवो धर्म: साङ्गो वेद: चिकित्सितम्।**
**अज्ञानसिद्धानि चत्वारि न हातव्यानि हेतुभि:॥**[1]

एवं वेदे कृतविश्वासा: भारतीया: दैवमेव सर्वस्य कारणं मन्वन्ते। प्राचीनकालादारभ्यैव मनुष्याणामालोचनाविधौ त्रिधा गति: वर्तते। केचन सर्वं दैवाधीनमिति वदन्ति। सर्वस्यापि कार्यस्य कर्ता य: भवति, स एव जगत् जनयति पालयते लोकं च गमयतीति तेषां विश्वास:।भारतीयानां पुनर्जन्मनि महान् विश्वास: वर्तते। अस्मिन् जन्मनि कृतमनुभोक्तव्यं च प्रारब्धमिति कथ्यते। भविष्यत् जन्मन: कारणमागामीति प्रथते। अतीतजन्मन: आगतमस्मिन् जन्मनि अनुभोक्तव्यं कर्मफलं सञ्चितमित्युच्यते।एवं कर्मण: त्रैविध्यमनुसृत्य दैविकं सङ्कल्पं च अनुसृत्य पूर्वोक्तदिशा प्राणिन:दैष्ठिका:, आस्तिका:, नास्तिकाश्चेति त्रिधा भवन्ति।

**दैष्टिक**: – दिष्टं च दैवञ्च सर्वं कार्यं सुखं, दु:खं, जीवितम्, आयु:, स्थिति:, ऐश्वर्यं, दारिद्र्यं सर्वमेतत् दैवेन देयम्। तत्र कर्मण: साफल्ये वैफल्ये च दैवमेव कारणम्। प्राणिनां पौरुषमकिञ्चित्करमिति तेषां विश्वास:। अत एव दिष्टमिति मति: एषां ते दैष्टिका:।**"दैवं दिष्टं भागधेयं भाग्यं स्त्रीनियतिर्विधि:" इत्यमर:।**
दैवमेव दिष्टं, दिष्टि:, कर्म, भाग्यं, नियति:, विधि:, काल:, भवितव्यता इत्यादिपदै: व्यवह्रियते।अत: सर्वं दैवाधीनमिति यस्याभिप्राय: स दैष्टिक:।

1.महाभारतम्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**आस्तिक**: – अस्ति दिष्टमिति मति: यस्य स: आस्तिक:।

**नास्तिक**:– नास्ति दिष्टं मति: यस्य स: नास्तिक:।

- **भाग्यपदस्य व्युत्पत्ति**:- भज्यते प्राणिभि: सेव्यते इति भाग्यम्। कर्मणि कृत्यप्रत्यय:।[१क] "ऋहलोर्ण्यत्" इति सूत्रेण ण्यत्-प्रत्यये णकारस्य **चुटू**[2]इति इत्संज्ञायां लोपे च धातुगत: जकारस्य **चजो: कुघिण्यतो**:[3] इति कुत्वम् **अत उपधाया**:[4] इत्युपधावृद्धिरिति रामाश्रमी।भागमर्हति **भाग्याद्यश्च**[5]इति यत्प्रत्यय:। "भाग्यं कर्म शुभाशुभम्" इति हैम: (2/7)।केषुचित् कोशेषु भज्-धातो: "ऋहलोर्ण्यत्" इति ण्यत्-प्रत्यये भाग्यशब्दो निष्पन्न: इत्युदाहृत:। तस्य शब्दस्य प्रारब्धकर्म इत्यर्थस्तत्र दृश्यते। "सौभाग्यं समृद्धि: हर्ष: कुशलता" इत्येते अर्था: अपि भाग्यशब्दस्य तत्र दृश्यन्ते। "भाग्यायत्तम्" इति कालिदासप्रयोगश्च तत्र द्रष्टुं शक्यते।एतस्य अदृष्टं, दैवं, दिष्टं, भागधेयं, नियति:, विधिरित्यादय: शब्दा: पर्यायवाच्या:। अदृष्टशब्द: यद्यपि शुभे चाशुभे च समानार्थक:, तथापि शुभफलकार्थे एव लोके व्यवहारो दृश्यते। एवं भाग्यशब्दस्यापि अतर्कितोपनते शुभफले शक्तिर्ग्राह्या।तादृशमतर्कितोपनतं क्वचित् दैविकं क्वचित् स्वकर्मफलस्वरूपञ्च भवति भाग्यम्।
- **भाग्यवाद**:- एवं प्राणिभि: अनुभाव्यं दैवनिर्मितं शुभमशुभं वा पौरुषमतिरिच्य भाग्यमेव प्रधानमिति प्रत्येकं ग्रन्थे कवय: प्रत्यक्षाप्रत्यक्षरूपेण सूचितवन्त:। सा एव चर्चा "भाग्यवाद:" इत्यभिधीयते। सकारात्मकालोचनं, सकारात्मकभावना एव (Positive Thinking) भाग्यवाद इत्युच्यते। एवमेव सर्वे मानवा: आनन्दसूत्रमाधारीकृत्यैव जीवनं यापयन्ति। सर्वेषु कालेषु सुखमेव चिन्तयन्ति। जीवने कान्त्यन्धकारवत् सुखदु:खे द्वे अपि आगच्छत:। मनुष्य: सुखागमने आनन्दमनुभवति, दु:खानुभवेन खिन्नो भवति। किन्तु बहून् क्लेशान् अनुभवति चेदपि स: प्रकृतिं दृष्ट्वा सकारात्मकदुष्टिं वर्धयति इत्युक्ते: स: भाग्यमन्विष्यन् भ्रमति। एतादृशी वर्णना एव भवति "भाग्यवाद:" इति। अभिज्ञानशाकुन्तलनाटकं सर्वमपि भाग्यविधेयमेव। महाभारते पद्मपुराणे, श्रीमद्भागवते च वर्तमाना शाकुन्तलकथा कविना कालिदासेन यथावसरं परिवर्तिता।
- **महाभारते शकुन्तलाकथा** - महाभारते शकुन्तला लोकव्यवहारजा प्रभावसम्पन्ना प्रगल्भभाषिणी च। शाकुन्तले सा मुग्धा पतिव्रता च। महाभारते मातु: सन्क्रान्तं वैशिकं लक्षणं तस्यां किञ्चिदिवासीत्। कण्व: फलान्याहर्तुं गत इति सा दुष्यन्तं जगाद तावन्त-कालमपि प्रतिपालयितुमक्षम: स: गान्धर्वविवाहाय शकुन्तलां चोदयामास। साऽपि तमर्थमङ्गीकृत्य अभिज्ञानमङ्गुलीयकं सङ्गमेन जातस्य शिशो: राज्याधिकार इत्यादि प्रतिफलं देयमिति जगाद। तथापि महाभारते सर्वमेतत् सङ्गमस्य मूल्यमिति वर्णितम्। "अस्तु मे सङ्गमस्तु त्वया" इति तत्र बहुधा उक्तम्। एवं विध: नियम: विवाहस्य अव्याजस्य प्रेम्ण: प्रतिबन्धकम्। जानतापि राज्ञा तिरस्कृता सा–

**क्षितावटसि राजेन्द्र अन्तरिक्षे चराम्यहम्।**
**ममैवोद्रिच्यते जन्म राजेन्द्र तव जन्मत:॥**

इत्यादिरूपेण निन्दति। शाकुन्तले एवंविधप्रगल्भा चेत् तद्भाग्यमव्याहतं भवेत्। परन्तुअत्र काव्यधर्ममनुसृत्य शकुन्तला निसर्गानुरागवती वर्णिता।

---

2.पा.सू. 3/1/124

3.पा.सू. 1/3/7

4.पा. सू. 7/2/116

5.पा.सू. 5/1/49

- **रामायणे शकुन्तलाया: जन्मवृत्तान्त:-** शाकुन्तले प्रथमाङ्के शकुन्तलाया: भाग्यंफलोन्मुखमेव आसीत्। जन्मना सा भाग्यहीना। मेनकाविश्वामित्रौ पञ्चविंशतिवर्षाणि संसारसुखानि अनुभूतवन्तौ। जातमात्रायां शकुन्तलायां तयो: समागमावधि: श्रीमद्रामायणे बालकाण्डे वर्णित:।

**तां ददर्श महातेजा मेनकां कुशिकात्मज:।**
**रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा॥**
**दृष्ट्वा कन्दर्पवशगो मुनिस्तामिदमब्रवीत्।**
**अप्सर: स्वागतं तेऽस्तु तस्य चेह ममाश्रमे॥**
**अनुगृहीष्व भद्रं ते मदनेन सुमोहितम्।**
**इत्युक्ता सा वरारोहा तत्र वासमथाकरोत्॥**
**तस्यां वसन्त्यां वर्षाणि पञ्च पञ्च च राघव।**
**विश्वामित्राश्रमे तस्मिन् सुखेन व्यतिचक्रमु:॥**[6]

एवं पञ्चविंशतिवर्षाणि कामोपभोगानन्तरं जाता शकुन्तला मात्रा हिमवत्प्रस्ते निर्माल्यमिवपरित्यक्ता। विश्वामित्रोऽपि नृशंस: जातमात्रामुत्सृज्य यदेच्छं गतवानिति महाभारते, रामायणे च स्पष्टम्।

- **शकुन्तै: शकुन्तलाया: रक्षणम्**

**अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति**
**जीवत्यनाथोऽपिवनेविसर्जित:कृत:प्रयत्नोऽपिगृहेनजीवति॥**

इति भागवतवचनं शकुन्तलाविषये सत्यमभूत्। सा तस्या: भाग्येनैव शकुन्तै: रक्षिता। यथा महाभारते – "शकुन्तैरथ गर्भोऽसौ ररक्षे पृथिवीपते" इति एवं शकुन्तरक्षितां शिशुं तस्या एव भाग्यविपर्ययेऽपि दृष्टभाग्या। कण्वप्रणिधानेन तस्या: जन्मवृत्तान्तं ज्ञातवान्। साक्षात्परम्परया वा शकुन्तलयाऽपि ज्ञातम् इदमन्यद्भाग्यं शकुन्तलाया: यत् कण्वस्य तां प्रति अनुरूपवरप्रदाने सङ्कल्प: एवं क्रमश: तस्या: भाग्यं दुष्यन्तविवाहपर्यन्तमनकूलमेवासीत्।

- **कण्वप्रेम-** चतुर्थाङ्के शकुन्तलायां कण्वस्य प्रेम बहुधा वर्णितम्। जन्मकारणहेतुभूतयो: – मेनकाविश्वामित्रयो: शकुन्तलायामौरस्यामपि या प्रीति: न वर्तते सा प्रीति: शकुन्तला कण्वात् लब्धवती। प्रायश: अपविद्धस्य सन्तानस्य एवंविधपालयितुर्लाभ: लोके दुर्लभ एव। प्राप्तामपि सुतां कण्व: औरस्या: सुताया: अपि वात्सल्येन पोषितवान्। प्रथमाङ्के एव तन्निदर्शनं दृश्यते। वृद्धोऽपि कण्व: शकुन्तलाया: दैवं प्रातिकूल्यं निवर्तयितुं तपश्चरणाय सोमतीर्थं गत:। अत्रान्तरे एव उपद्रव: समुत्पन्न:। प्रायश: शकुन्तलाया: प्रातिकूल्यं दैवेन दुष्यन्तविवाहा- नन्तरमेव उपपादितं स्यात्। तपोवनात् प्रत्यागमनसमनन्तरमेव स शकुन्तलायां जातचित्त: स्यात्। अत एव अग्निशरणालिन्दे प्रविष्टस्यापि शकुन्तला स्मृतिरेवासीत्। अत: शकुन्तला दुष्यन्तेन परिणतपूर्वा इति अशरीरिणी वाक् तमूचे।

**दुष्यन्तेनाहितं तेजो दधानां भूतये भुव:।**
**अवेहि तनयां ब्रह्मन्नग्निभार्यां शमीमिव॥**[7]

---

6.रा.बा.का.– 53.5.58

शकुन्तला पितृप्रेम्ण: भाग्यं यादृगनुभूतवती तत्सर्वं श्लोकचतुष्टये शाकुन्तले पिण्डीकृतम्। कण्व: शकुन्तलागमनसमये स्वस्य दु:खमन्येभ्य: संविभज्य भोक्तुं न शक्नोति धीरप्रकृतित्वात्। अत: वृक्षादीनेव उद्दिश्य आलापनेन स्वव्यथा: दूरीचकार। यदाहु: –

**पूर्वोत्पीडे तटाकस्य परीवाह: प्रतिक्रिया।**

**शोकक्षोभे च हृदयं प्रलापैरेव धार्यते॥**[8]

तत: कण्व: दु:खोपशमनाय वृक्षान् आमन्त्रितवान्।

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषुया**

**नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्।**

**आद्ये व: कुसुमप्रसूतिसमये यस्या भवत्युत्सव:**

**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥**[9]

शकुन्तलाया: भाग्यवशेन वनदेवतानामपि तस्यां बहुतरा प्रीतिरासीत्। पतिगृहगमनसमयेमण्डनद्रव्यार्थं वृक्षेषु चरद्भ्य: कण्वशिष्येभ्य: वनदेवताभि: सर्वं शकुन्तलाप्रसाधनसाधनं दत्तम्।

**क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं**

**निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारस: केनचित्।**

**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-**

**र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभि:॥**[10]

इति कण्वशिष्यवाक्येषु तत्स्पष्टम्। कण्व: शकुन्तला पतिगृहगमनसमये यादृक् दु:खमनुभूतवान् तदपि पितृप्रेमसूचकं भाग्यमेव।

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**

**कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।**

**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकस: पीड्यन्ते**

**गृहिण: कथं नु तनयाविश्लेषदु: खैर्नवै:॥**[11]

वदति च अत्र तृतीयचरणे अर्थापत्त्या गृहस्थानां दु:खनिरवधिकमिति सूचितम्। शकुन्तलया आत्मप्रधानसमये गुरुजन: नापेक्षित: एवं स्वतन्त्रचारिणीमपि तामनुरागेणैव कण्व: चक्षमे। एवं –

**सङ्कल्पितं प्रथममेव मया तवार्थे**

**भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।**

---

7.अ.शा. 4/4

8.उ.रा.च. – 3/29

9.अ.शा. – 4/9 2

10.अ.शा. – 4/5 3

11.अ.शा. – 4/6

**चूतेन संश्रितवती नवमालिकेय**

**मस्यामहं त्वयि च सम्प्रति वीतचिन्तः॥**[12]

एवं शकुन्तलायाः मनसः अनुसारेण तया एव स्वीकृतः भर्ता न किञ्चित् सन्देष्टव्यः।सद्वरप्रतिपादनाय कण्वप्रार्थना – कण्वः स्वयञ्च शकुन्तलायामनुरागं दर्शयेत् तथापि –शङ्कितः पिता दुष्यन्तं सन्दिशन् स्वतपोनिधित्वकथनेन किञ्चित् भयमपि उपदिष्टवान्। यथा –

**अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः**

**त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।**

**सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया**

**भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥**[13]

शकुन्तलाभाग्यमपि कण्वेन अस्मिन् श्लोके निर्दिष्टम्। अस्माकं संयमः एव धनम्। त्वं शकुन्तलायां दर्शितानाधरः दण्डितो भवसि इति ध्वनिः रेखामात्रेण गम्यतेऽत्र। अभिजातस्त्वं प्रकृतः इव इमां तिरस्कर्तुं नार्हसि। अन्योऽन्यकलहे पुनः सौहार्दं साधयितुं बन्धूनां प्रमेयः बन्धकृते विवाहे भवति। स्नेहप्रवृत्तिः अबान्धवकृता इति हेतोः नैसर्गिकी फलानपेक्षिणी भवेत्। इयञ्च या प्रतिपत्तिः साधारण्येन अन्तः पुरस्त्रीभ्यः दीयते तथैव प्रतिपत्त्या द्रष्टव्या। अनेकभार्यासु सतीषु तासु समानादरः परिणीत्रा दर्शयितव्यः। दाम्पत्यदिनक्रमः विभवे परिजनः, निवासस्थितिः, भोजनाच्छादन-दान-रक्षा इति प्रतिपत्तिः, सर्वस्त्रीसाधारणा ततोऽधिका प्रतिपत्तिः एषा नाभिलषति। अयाचितसौख्यादिप्राप्तिः भाग्येन यदि सम्पद्यते तद् वधूबन्धुभिः नादेष्टव्यम्। अस्माकं कन्या सपत्नीभ्यः श्रीयुक्ते भवने वासनीया अधिकान्याभरनानि अस्यै देयानि।दुकूलानि प्रतिपादनीयानि सर्वदा अस्या एव गृहे इतराः विहाय त्वया निवासकार्य इत्यादिः निर्बन्धः सपत्नीबाधकः न प्रार्थनीयः।

कदाचित् अप्रार्थितं तद्भाग्यवशेन लभ्यते तदा वधूभाग्यमेव अत्र भाग्यपदं कालिदासः साभिप्रयां प्रयुङ्क्ते। विशेषतः आयत्तशब्दयोगेन भाग्ये आयत्तं भाग्यायत्तमिति। सर्वपि सुखदुःख्खादिकं भाग्याधीनमित्यर्थः। ( भाग्यपरतन्त्रं न स्वतन्त्रञ्च )

**परतन्त्रःपराधीनः परवान्नाधवान्नपि।**

**आधीननिम्नायत्तः अस्मतन्त्रः गुह्योऽस्यौ॥** इत्यमरः।

क्वचित् प्राप्यमपि यत्र लभ्यते तत्रैव भाग्यं कारणं मन्तव्यमिति कवेः आशयः। अलाभेऽपि शोकः न कार्यः। अत्र केचित् “सामान्यप्रतिपत्तिः” इति पादे “सा मान्यप्रतिपत्तिपूर्वकम्” इति पदच्छेदनमत्यन्तगौरवेण द्रष्टव्या इति सन्देशसारं वदन्ति। अपरेषु “सा-मा-अन्यत्-प्रतिपत्तिपूर्वकम्” इति छेदेन अन्यासां सपत्नीनां या प्रतिपत्तिः तथाविधप्रतिपत्तिमात्रेण एषा न दृश्या आधिक्येन द्रष्टव्या इत्यादि व्यचिख्या सन्ति। (व्याख्यानं कर्तुमिच्छा व्यचिख्या इति) चतुर्थपादविरोधात् सर्वमुत्प्रेक्ष्यम्।

शकुन्तलायै कण्वाशीः – शकुन्तलां प्रति सन्दिशन् कण्वः हितं वदन्नेव अनुरागं दर्शयति।

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने**

**भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।**

**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**

**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥**[14]

---

12.अ.शा. – 4/13

13.अ.शा. – 4/17

1) गुरुजनसेवनम्
2) सपत्नीजनैः सह स्नेहभावना
3) भर्तुः विषये सत्प्रवर्तना
4) परिजनानां विषये दाक्षिण्यप्रधानम्
5) ऐश्वर्यवत्यपि गर्वरहिता भवितव्या

इत्येवंरूपेण हितमुक्तवान् कण्वमुनिः।

अत्र "भाग्येष्वनुत्सेकिनी" इत्यत्र भाग्येन प्राप्तेषु सुखेषु इत्यन्वयः कार्यः। भाग्यपदस्य सामान्यसुखदुःखादिविषयकत्वेऽपि उत्सेकपदसाहचर्येण सुखमात्रग्रहणम्।पञ्चमाङ्केऽपि राज्ञा प्रत्याख्यातापि शकुन्तला कण्वशिष्यैः अनुनीता। अनुनयेऽपि शाङ्र्गरवस्यतीव्रतैव दृश्यत इत्यत्र धर्मः कारणम्। न शकुन्तलाभाग्यम्।

**यदि यथा भवति क्षितिपस्तथा**

**त्वमसि किं पितुरुत्कुलया त्वया।**

**अथ तु शुचिव्रतमात्मनः**

**पतिकुले तव दास्यमपि क्षमम्॥**[15]

इति आदेशे शाङ्र्गरवः शकुन्तलाभाग्यमेव निन्दति। शकुन्तलायां तु तस्य वात्सल्यमनल्पमेवस शकुन्तलाया एव वाक्यानि विश्वसिति न राज्ञ इति शकुन्तलाभाग्यमेव। अन्यथा शकुन्तला निन्दिता स्यात् . शाङ्र्गरवः राजानमेवं वदति –

**आजन्मनः शाठ्यमशिक्षितो य**

**स्तस्याप्रमाणं वचनं जनस्य ।**

**परातिसन्धानमधीयते यै**

**र्विद्येति ते सन्तु किलाप्तवाचः॥**[16]

- **अङ्गुलीयकप्राप्तिः-** शाकुन्तले शकुन्तला भाग्यवती इति कथयितुं प्रत्यक्षतया दृश्यमानः सन्निवेश एक एव तदङ्गुलीयकप्राप्तिः। षष्ठाङ्के प्रवेशिकायामपि धीवरवृत्तान्तेन शकुन्तलायाः भाग्यमेव सूचितम्। प्रायशः प्रवाहे पतितं बृहदपि वस्तु पुनः न लभ्यते। हिमवतः उपत्यकासु गङ्गा महता वेगेन प्रवहति। सर्वाः नदीशाखाः तत्रत्याः गङ्गायाः एव भवति नाम तु भिन्नं स्यात्। तादृक् प्रवाहे पतितमपि अङ्गुलीयकं केनापि मत्स्येनैव ग्रस्तं न सैकते अन्तर्हितं न वा शिलामध्ये पतितं सोऽपि मत्स्यः धीवरेण गृहीतः। सर्वे मत्स्या; जालोपजीविभिः गृहीताः न भवन्ति। सोऽपि धीवरेण आसादितः तं मत्स्यं यथायथमविक्रिय्य खण्डशः कल्पनं राजपुरुषैः ग्रहणं पुनः राज्ञा अङ्गुलीयकदर्शनमिति तत्सर्वमसम्भाव्यमपि शकुन्तलायाः भाग्यवशेनैवासीत्।
- **कश्यपाश्रमे निवासः** - भर्त्रा तिरस्कृतां शकुन्तलां मेनका स्वर्गं नीत्वा कश्यपाश्रमे वासयामास। शकुन्तलायाः भाग्यवशेन पुनः दुष्यन्तः कश्यपाश्रममाजगाम। इदमपरं शकुन्तला भाग्यविपर्ययकारणं पञ्चमाङ्कारम्भे विदूषकनिर्गमनम्। हंसपादिका नाम दुष्यन्तपत्नी वीणामुपवीणयन्ती एवं गीतवती – –

---

14.अ.शा. – 4/18

15.अ.शा. – 5/27

16.अ.शा. 5/25

**अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।**

**अमलवसतिमात्रनिर्वृत्तो मधुकर ! विस्मृतोऽस्येनां कथम्॥**[17]

ततः राजा तामनुनेतुं विदूषकं प्रेषितवान्। शकुन्तला प्रत्याख्यानसमये यद्ययं सन्निहितः तदा साक्षी भवेदेव। षष्ठाङ्के राजा विदूषकमेवं जगाद – किमिति शकुन्तलाविषयः त्वया न स्मारित इति। तदानीं विदूषकः द्वितीयाङ्कान्तवचनं स्मरन् दुष्यन्तमेवमुक्तवान्-"भवतैव तस्याः कथा परिहासविजल्पितमिति भणितम्" इति। एवं द्विः विदूषकदूरीकरणं शकुन्तलाभाग्यकृतमेव। अन्यथा मातुः अनुरागः कश्यपाश्रमे निवासः, भरताय कश्यपस्य आशिषः, दुष्यन्तस्य अनुतापः, दुष्यन्तेन क्षमायाचनम् इति तत्सर्वमसम्भाव्यमेव।

सप्तमाङ्कान्ते शापोहतचेतस्कः त्वं तिरस्कृतवानिति शकुन्तलां दुष्यन्तः बहुधा अनुनयति।

**सुतनु ! हृदयात्प्रत्यादेशव्यलीकमपैतु ते**

**किमपि मनसः सम्मोहो मे तदा बलवानभूत्।**

**प्रबलतपसामेवंप्रायाः शुभेषु हि वृत्तयः**

**स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहि शङ्कया॥**[18]

कश्यपः शकुन्तलायै आशिषं प्रयुञ्जानः तस्याः भाग्यमेवं प्रशशंस।

**आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः।**

**आशीरन्या न ते योग्या पौलोमी सदृशी भव ॥**[19]

- **शकुन्तलायाः भाग्यविपर्ययः-** दुष्यन्तस्य परिहासवचनानि – शकुन्तलायाः भाग्यविपर्ययः बीजरूपतया द्वितीयाङ्कान्ते एव निरूपितः। स च विदूषकनिष्क्रमणात्मकः दुष्यन्तः यज्ञरक्षार्थमाश्रममाहूतः दुष्यन्तः विदूषकमपि आश्रमं नेतुमियेष। विदूषकोऽपि राजानं रक्षकं दृष्ट्वा राक्षसपीडामगणयन् आश्रमं गन्तुमुच्छुकःअत्रान्तरे राजमाता पुत्रपिण्डपालनव्रतोऽध्यापनार्थं पुत्रं प्रतिनिवर्तमानमैच्छत्। राजाऽपिकार्यव्याकुलः–

**कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः।**

**पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा॥**[20]

तदा राजा उपायमेकं चिन्तयामास। विदूषकोऽपि मातुः पुत्रकल्पः। अतः विदूषकेन पारणनिर्वाह्य ततो विदूषकं राजधानीं प्रेषयामास। सर्वं च सैन्यमाश्रमोपप्लवकारकमपि नगरमेव प्रेषितवान्।

ततः एक एव आश्रमं जगामनगरप्रस्थानकाले विदूषकमेवमुक्तवान् –

**क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः।**

**परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः ॥**[21]

---

17.अ.शा. – 5/01

18.अ.शा. – 7/24

19.अ.शा. – 7/28

20.अ.शा. 2/17

21.अ.शा. 2/18

चपलोऽयं वटुः अन्तः पुरे शकुन्तलावृत्तान्तं प्रचारविषयी करोतीति शङ्कितः दुष्यन्तः एवमवदत्। केचित् दुष्यन्तः सत्यमेव जगाद इति निरूपयितुं श्लोकद्वितीयार्धे "परमार्थे" इति सप्तम्यन्तमन्वयि। नकारद्वयं पठन्ति परमार्थैवेति भावः। तेषां मते परिहासविजल्पितमिति वचनमसङ्गतमेव भवति। दुष्यन्तः स्त्रीविषये असत्यमुक्तवान् इत्यत्र न दोष इति वक्तुं महाभारतमेव प्रमाणम्।

**न नर्मयुक्तं वचनं हिनस्ति न स्त्रीहु राजन्त विवाहकाले।**

**प्राणात्यये सर्वथानापहारे पञ्चानृतान्याहरपातकानि॥**

एवं साक्षिरूपः विदूषकः तृतीयाङ्के नास्तीति शकुन्तलायाः भाग्यविपर्यय एव।

- **दुर्वास-शापवृत्तान्तः** - कविना कालिदासेन कल्पितः दुर्वाससः शाकुन्तले चातिरम्यः। चतुर्थाङ्के शकुन्तलायाः भाग्यमाकुलीकृतं दैवने। गान्धर्वेण विधिना परिणीय "पश्चात् त्वां नेष्यामि" इति प्रतिज्ञाय दुष्यन्तः नगरं गतः। दुष्यन्तमेव चिन्तयन्ती शकुन्तला आश्रमद्वारदेशे तस्थौ। तदा सुलभकोपः दुर्वासाः अतिथिभूया आगत्य "कः कोऽत्र भोः !" इति आहूतवान्। दुष्यन्तलग्नमनस्का शकुन्तला तन्न श्रुतवती। ततः दुर्वासाः तामेवं शशाप आः अतिथिपरिभाविनि ! –

**विचिन्त्यन्ती यमनन्यमानसा**

**तपोधनं वेत्सि न मामुपस्थितम्।**

**स्मरिष्यति त्वां न स बोधितोऽपि**

**सन् कथां प्रमत्तः प्रथमं कृतामिव॥**[22]

ततः पुष्पापचयं कुर्वन्त्यौ सख्यौ तत्र आजग्मतुः। शापं निवर्तयितुं दुर्वाससमनुसूया बहुधा प्रार्थयामास। सोऽपि अभिज्ञानदर्शनेन शापो निवर्तिष्यति इत्युक्त्वा जगाम। शकुन्तला खिन्ना भीता च भवतीति सख्यौ तां शापं नोक्तवत्यौ। प्रवासात्प्रतिनिवृत्तः कण्वः तां पतिगृहं प्रेषयितुं कृतयत्नो बभूव। तदाऽपि सख्यौ शापवृत्तान्तं न कस्मैचित् ऊचतुः। शाङ्गर्रवशारद्वतौ गौतमी च शकुन्तलां नीत्वा पतिगृहं गतवन्तः। शापमोहितः राजा शकुन्तलां तिरस्कृतवान्। यदा शकुन्तला अङ्गुलीयकं दर्शयितुं यत्नं कृतवती तदैव तन्नष्टमिति शकुन्तलया ज्ञातम्। ततः शाप : अनवशितः शकुन्तला च दुष्यन्तेन तिरस्कृता।

**सन्दर्भग्रन्थसूची**


1. अभिज्ञानशाकुन्तलम्, कालिदासः, चौखम्बासंस्कृतसीरीज आफिस, वाराणसी,1970
2. अमरकोशः, रामाश्रमी टीकासहित, चौखम्बासंस्कृतसीरीज आफिस, वाराणसी,1970
3. अष्टाध्यायी( पाणिनिः ),श्री रा. चन्द्रवासुः,मोतीलालबनारसीदासः,दिल्ली
4. अष्टाध्यायी, ज्ञानभारती पाब्लिकेशन्, दिल्ली, 2009
5. उत्तररामचरितम्, भवभूतिः, मोतीलाल बनारसीदास-दिल्ली,1999
6. मनुस्मृतिः, मोतीलाल बनारसीदास-दिल्ली,1983
7. रामायणम्, वाल्मीकिः (अनुवादक - दासमार्कण्ड), भूवनेश्वरम्, 1997
8. श्रीमद्रामायणम्- वाल्मीकिः गीताप्रेस् गोरख्पुर् विक्रम सं. 2010


---

22.अ.शा. 4/1